श्री वेंकटेश स्तोत्रं

श्री वेंकटेश स्तोत्रं

कौशिकश्रीनिवासार्यतनयं विनयोज्ज्वलं |
वात्सल्यादिगुणावासं वंदे वरददेशिकं ||

पद्मस्थां युवतीं परार्ध्यवृषभाद्रीशायतोरस्स्थली-
मध्यावासमहोत्सवां क्षणसकृद्विश्लेषवाक्यासहां |
मूर्तीभावमुपागतामिव कृपां मुग्धाखिलांगां श्रियं
नित्यानंदविधायिनीं निजपदे न्यस्तात्मनां संश्रये || 1 ||

श्रीमच्छेषमहीधरेशचरणौ प्राप्यौ च यौ प्रापकौ
अस्मद्देशिकपुंगवैः करुणया संदर्शितौ तावकौ |
प्रोक्तौ वाक्ययुगेन भूरिगुणकावार्यैश्च पूर्वैर्मुहुः
श्रेयोभिः शठवैरिमुख्यमुनिभिस्तौ संश्रितौ संश्रये || 2 ||

यस्यैकं गुणमादृताः कवयितुं नित्याः प्रवृत्ता गिरः
तस्याभूमितया स्ववाङ्मनसयोर्वैक्लब्यमासेदिरे |
तत्तादृग्बहुसद्गुणं कवयितुं मोहाद्वृषाद्रीश्वरं
कांक्षे कार्यविवेचनं न हि भवेन्मूढाशयानां नृणां || 3 ||

यत्पादा ॥ योषितं निजसकृत्स्पर्शेन कांचिच्छिला-
मंगार ॥ डिंभतामनुपमौ शांतं कमप्यंचितौ |
यत्पादूरखिलां शशास च महीमाश्चर्यसीमास्थलीं
अद्राक्षं हरिमंजनाचलतटे निर्निद्रपद्मेक्षणं || 4 ||

अत्रस्यन्मणिराजराजिविलसन्मंजीरनिर्यन्महः-
स्तोमप्रास्तसमस्तविस्तृततमश्श्रीमंदिराभ्यंतरं |
व्याकोचांबुजसुंदरं चरणयोर्द्वंद्वं वृषाद्रीशितुः
चक्षुर्भ्यामनुभूय सर्वसुलभं प्राप्स्यामि मोदं कदा || 5 ||

सत्कृत्या समकाललब्धतनुभिर्गोपीभिरत्यादरात्
विन्यस्तौ वदने कुचे च नितरां रोमांचरोहांचिते |
पद्माभूकरपल्लवैः सचकितं संवाह्यमानौ मृदू
मान्यौ वेंकटभूधरेशचरणौ मार्गे दृशोः स्तां मम || 6 ||

प्रातः फुल्लपयोरुहांतरदलस्निग्धारुणांतस्थलौ
निष्पीताखिलनीरनीरधिलसन्नीलांबुदाभौ बहिः |
राकाशीतमरीचिसन्निभनखज्योतिर्विितानांचितौ
पादौ पन्नगपुंगवाचलपतेर्मध्येमनस्स्तां मम || 7 ||

मंदारप्रसवाभिरामशिरसां बृंदारकश्रेयसां
बृंदैरिंदुकलाभृता च विधिना वंद्यौ धृतानंदथू |
बंधच्छेदविधायिनौ विनमतां छंदश्शताभिष्टुतौ
वंदे शेषमहीधरेशचरणौ वंदारुचिंतामणी || 8 ||

चिंचामूलकृतासनेन मुनिना तत्त्वार्थसंदर्शिना
कारुण्येन जगद्धितं कथयता स्वानुष्ठितिख्यापनात् |
निश्चिक्ये शरणं यदेव परमं प्राप्यं च सर्वात्मनां
तत्पादाब्जयुगं भजामि वृषभक्षोणीधराधीशितुः || 9 ||

नंदिष्यामि कदाऽहमेत्य महता घर्मेण तप्तो यथा
मंदोदंचितमारुतं मरुतले मर्त्यो महांतं ह्रदं |
संतप्तो भवतापदावशिखिना सर्वार्तिसंशामकं
पाददृंद्वमहीशभूधरपतेर्निर्द्वंद्वह्रन्मंदिरं || 10 ||

यौ बृंदावनभूतले व्यहरतां दैतेयबृंदावृते
कुप्यत्कालियविस्तृतोच्छ्रितफणारंगेषु चानृत्यतां |
किंचानस्समुदास्थतां किसलयप्रस्पर्धिनावासुरं
तन्वातां मम वेंकटेशचरणौ तावंहसां संह्रतिं || 11 ||

शेषित्वप्रमुखान्निपीय तु गुणान्नित्या हरेस्सूरयो
वैकुंठे तत एत्य वेंकटगिरिं सौलभ्यमुख्यानिह |
नित्योदंचितसंनिधेर्निरुपमान्निर्विश्य तस्याद्भुतान्
निर्गंतुं प्रभवंति हंत न ततो वैकुंठकुंठादराः || 12 ||

संफुल्लाद्भुतपुष्पभारविनमच्छाखाशतानां सदा
सौरभ्यानुभवाभियन्मधुलिहां संघैर्वृते भूरुहां |
उद्यद्रश्मिभिरुज्ज्वलैर्मणिगणैरुत्तुंगशृंगैर्वृष-
क्षोणीभर्तरि वर्ततेऽखिलजगत्क्षेमाय लक्ष्मीसखः || 13 ||

नानादिङ्मुखवासिनो नरगणानभ्यागतानादरात्
प्रत्युद्यात इवांतिकस्फुटतरप्रेक्ष्यप्रसन्नाननः |
सानुक्रोशमनास्सडिंभमहिलान् संप्राप्तसर्वेप्सितान्
कुर्वन्नंजनभूधरे कुवलयश्यामो हरिर्भासते || 14 ||

आपादादनवद्यमाच शिरसस्सौंदर्यसीमास्पदं
हस्तोदंचितशंखचक्रमुरसा बिभ्राणमंभोधिजां |
माल्यैरुल्लसितं मनोज्ञमकुटीमुख्यैश्च भूषाशतैः
मध्येतारणमंजनाचलतटे भांतं हरिं भावये || 15 ||

मंजीरांचितपादमद्भुतकटीविभ्राजिपीतांबरं
पद्मालंकृतनाभिमंगमहसा पाथोधरभ्रांतिदं |
पार्श्वालंकृतिशंखचक्रविलसत्पाणिं परं पूरुषं
वंदे मंदहसं विचित्रमकुटीजुष्टं वृषाद्रीश्वरं || 16 ||

नानाभासुररत्नमौक्तिकवरश्रेणीलसत्तोरण-
स्वर्णस्तंभयुगांतरालकभृशप्रद्योतमाननं |
आनासश्रुतिलोलनीलविशदस्निग्धांतरक्तेक्षणं
नाथं प्रेक्षितुमंजनाचलतटे नालं सहस्रं दृशां || 17 ||

चक्राब्जे करयुग्मकेन सततं बिभ्रत् करेण स्पृशन्
सव्येनोरुमपीतरेण चरणौ संदर्शयन् भूषणैः |
सद्रत्नैः सकला दिशो वितिमिराः कुर्वन् वृषाद्रौ हरिः
शुद्धस्वांतनिषेविते विजयते शुद्धांतबाहांतरः || 18 ||

सुस्निग्धाधरपल्लवं मृदुहसं मीनोल्लसल्लोचनं
गंडप्रस्फुरदंशुकुंडलयुगं विभ्राजिसुभ्रून्नसं |
फालोद्भासिपरार्ध्यरत्नतिलकं वक्त्रं प्रलंबालकं
भव्यं वेंकटनायकस्य पिबतां भाग्यं न वाचां पदं || 19 ||

त्वत्पादांबुजसस्पृहं मम मनः कुर्यास्त्वदन्यस्पृहां
दूरं तोलय दुःखजालजननीं त्वत्पादवांछाद्विषं |
किंच त्वत्परतंत्रभूसुरकृपापात्रं क्रिया मां सदा
सर्पाधीश्वरभूधरेंद्र भगवन् सर्वार्थसंदायक || 20 ||

नाकार्षं श्रुतिचोदितां कृतिमहं किंचिन्न चावेदिषं
जीवेशौ भवभंजनी न च भवत्पादाब्जभक्तिर्मम |
श्रीमत्त्वत्करुणैव देशिकवरोपज्ञं प्रवृत्ता मयि
त्वत्प्राप्तौ शरणं वृषाचलपतेऽभूवं ततस्त्वद्वरः || 21 ||

श्रीमत्कौशिकवंशवारिधिविधोः श्रीवेंकटेशाख्यया
विख्यातस्य गुरोर्विशुद्धमनसो विद्यानिधेः सूनुना |
भक्त्यैतां वरदाभिधेन भणितां श्रीवेंकटेशस्तुतिं
भव्यां यस्तु पठेदमुष्य वितरेच्छ्रेयः परं श्रीसखः ||

इति वेंकटेश स्तोत्रं |